दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

पञ्चाङ्गम्
अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्धः ५१२७ शिशिर-ऋतुः
सूर्यः उत्तरायणम् फाल्गुणकृष्णपञ्चमी
माघ 24 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-5 ■ वर्ष-5 ■ अङ्क-106 | 1 | फरवरी 06, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com



2 सेशेल्स-राष्ट्रपतिः डॉ. पैट्रिक हर्मिनी पञ्चदिवसीय-भारतयात्रायाम्

3 विद्यालयेषु छात्राणां मोबाइल-दूरभाष-प्रयोगे १ मार्चतः प्रतिबन्धः भविष्यति- मुख्यमन्त्री सुखविन्द्रसिंहः सुक्खुः

5 विद्याधनधर्मसुखानां सम्बन्धसमीक्षा


## प्रधानमन्त्री नरेन्द्रमोदी राष्ट्रपत्याभिभाषणे धन्यवाद-प्रस्तावम् अधिकृत्य स्वकीयं उत्तरं प्रयच्छत्



प्रधानमंत्री नरेन्द्रमोदी राष्ट्रपत्याभिभाषणे धन्यवाद-प्रस्तावम् अधिकृत्य स्वकीयं उत्तरं प्रयच्छत् । राज्यसभायां चर्चायाः उत्तरं प्रयच्छन् श्रीमोदी अकथयत् यत् भारतेन विकसित-भारतं प्रति द्रुतगत्या अग्रे गम्यते ।
राष्ट्रपतिः द्रौपदीमुर्मु-वर्या विगतमासस्य अष्टविंशति-दिनाङ्के द्वयोः सदनयोः संयुक्तोपवेशनं सम्बोधितवती । इतः पूर्व, चर्चायां भाग भजन्ती, बीजेपी-दलस्य सांसदा माया-नारोलिया प्रोक्तवती यत् प्रधानमंत्रिणः नरेन्द्रमोदिनः नेतृत्वे, देशः सप्तचत्वारिंशदुत्तर-द्विसहस्रतमाब्दं यावत् विकसितभारतस्य लक्ष्यं प्रति निरन्तरम् अग्रे वर्धते । सा अकथयत् अद्य देशे ग्रामीणक्षेत्रेषु एक-लक्षतः अधिकानि आयुष्मान-आरोग्य-मन्दिराणि निर्माय स्वास्थ्यसेवाः प्रदत्ताः सन्ति । एतत् सबलं कथयन्ती यत् कृषकाः सर्वकारस्य सर्वोच्चप्राथमिकताः सन्ति, श्रीमती नारोलियावर्या अकथयत् यत् पीएम-किसान-सम्मान-निधि-योजना इत्यस्याः अन्तर्गतं कृषकेभ्यः चतुर्लक्ष-कोटि-रुप्यकाणि वितरितानि ।

### लोकसभायां राष्ट्रपतेः अभिभाषणस्य धन्यवादप्रस्तावः ध्वनिमतद्वारा स्वीकृतः ।

लोकसभायाः कार्याचरणे निरन्तरं व्यवधानम् अभवत्, यतः भारत-अमेरिका-व्यापार-सन्धिना सह विविधविषयेषु विपक्षस्य कोलाहलः सञ्जातः। निरन्तरं प्रवर्तमानस्य कोलाहलस्य मध्ये, सभायां राष्ट्रपतेः अभिभाषणस्य धन्यवादप्रस्तावः ध्वनिमतद्वारा स्वीकृतः । लोकसभायाः अध्यक्षः ओम बिरला-वर्यः विपक्षि-सांसदानां व्यवहारे क्षोभं प्रकटितवान्, सः अवदत् यत् विपक्षस्य सांसदानाम् अनुचित-व्यवहारस्य कारणात् प्रधानमन्त्री नरेन्द्रमोदी धन्यवाद प्रस्तावस्य विषये उत्तरं दातुं सभां न आगच्छत् । निम्नसदने अपि त्रीणि स्थगनानि दृष्टानि, ततः परम् अन्ततः दिनपर्यन्तं यावत् स्थगनं सजातम्

## बङ्गालसर्वकाराय सर्वोच्च-न्यायालयेन प्रलम्बितस्य डी ए इत्यस्य पञ्चविंशति-प्रतिशन्मितस्य देयस्य परिष्कारस्य निर्देशः दत्तः



ममतावनर्जी इत्यस्य नेतृत्वभूताय बङ्गालसर्वकाराय न्यायालयेन प्रलंबितस्य डी ए इत्यस्य परिष्कारस्य निर्देशः दत्तः अस्ति प्रायः विंशति-लक्षसंख्याकानां राज्यसर्वकारस्य कर्मचारिणां कृते डीए इति देयराशिः प्रदातव्या अस्ति । न्यायालयेन राज्यं अग्रिममासस्य षट्-दिनाङ्कपर्यन्तं डी. ए. इति देयराशेः न्यूनातिन्यूनं पञ्चविंशति-प्रतिशतं राशिं दातुम् आदिष्टम्, पूर्वतनानि निर्देशानि पुनः दृढीकृतानि यानि वर्षाणि यावत् प्रलंबितानि आसन्। डी. ए. इत्यस्य विवादः अष्टोत्तर-द्विसहस्रतमाब्दात् प्रचलति यत्र कर्मचारिणः वैधानिकरूपेण योग्याः भूत्वा अपि लाभवञ्चिताः सन्ति इत्यारोपः कर्मचारिभिः प्रख्यापितः अस्ति । सर्वोच्चन्यायालयेन पूर्व कर्मचारिणां पक्षे निर्णयः दत्तः आसीत्, परन्तु राज्यसर्वकारः निर्देशानाम् अनुपालने असफलः अभवत् । अद्यतनस्य निर्णये सर्वोच्चन्यायालयेन पुनः दृढीकृतं यत् दशकाधिक कालात् सञ्चिता देयराशिः अवश्यमेव प्रदातव्या ।

## भारत-गल्फ-को-आपरेशन-कौन्सिल इत्येतयोः मध्ये स्वतन्त्र-व्यापार-सन्धिः इत्यस्य कृते टर्म्स-आफ़-रेफ़रेन्स् इत्यस्मिन् हस्ताक्षरं जातम्

भारत-गल्फ-को-आपरेशन-कौन्सिल इत्येतयोः मध्ये अद्य नवदिल्ल्यां स्वतन्त्र व्यापार-सन्धिः इत्यस्य कृते टर्म्स-आफ़-रेफ़रेन्स् इत्यस्मिन् हस्ताक्षरं जातम्। समारोहस्य अध्यक्षतां कुर्वन् वाणिज्य-उद्योग मन्त्री पियूष गोयल-वर्यः अवदत् यत् भारतस्य गल्फ-को-आपरेशन-कौन्सिल इत्यस्य षट्-देशैः सह मुक्तव्यापार-सन्धिना अन्यः प्रमुखः व्यापारमार्गः उद्घाटितः भविष्यति । श्रीगोयल-वर्यः अवदत् यत् भारतं शीघ्रमेव अमेरिकादेशेन सह स्वीकृतायाः व्यापार-सन्धेः प्रथमभागस्य घोषणां करिष्यति ।

## भारत-अमेरिका-देशयोः मध्ये द्वैपाक्षिक-व्यापार-सन्धेः प्रथमः भागः प्रायः सज्जः - पियूषगोयलः




व्यापार-वाणिज्य-उद्योग-मन्त्री पियूष गोयल-वर्यः अवदत् यत्, भारत-अमेरिका-देशयोः मध्ये द्वैपाक्षिक-व्यापार-सन्धेः प्रथमः भागः प्रायः सज्जः अस्ति। सः नवदेहल्यां सञ्चार माध्यमान् सम्बोधयन् आसीत्। श्री-गोयलवर्यः अवदत् यत्, भारते प्रायः चतुष्पञ्च-दिवसेषु उभयदेशयोः मध्ये संयुक्तवक्तव्यं अन्तिमं कृत्वा हस्ताक्षरं कर्तुं अपेक्षते । सः अवदत् यत् संयुक्त-वक्तव्यस्य हस्ताक्षरानन्तरं अमेरिका वर्तमान-शुल्कं अष्टादश प्रतिशतं यावत् न्यूनं कर्तुं कार्यकार्यदिशं प्रख्यापयिष्यति ।

**भारत-अमेरिका-व्यापार-सन्धिः अन्तिमस्तरे अस्ति- एस. जयशङ्करः ।**

विदेशमन्त्री एस. जयशङ्करः उक्तवान् यत् ऐतिहासिकी भारत-अमेरिका-व्यापार-सन्धिः अन्तिमस्तरे अस्ति, या शीघ्रमेव पूर्णा भविष्यति। सामाजिक सञ्जाल-माध्यमेन डा. जयशङ्करः अवदत् यत्, व्यापार-सन्धिना भारत-अमेरिका-द्वैपाक्षिक-सम्बन्धेषु नूतनं चरणं उद्घाटितम् अस्ति, यत्र सम्बन्धानां विशाल-सम्भावनाः सन्ति । सद्यः समाप्तिङ्गते अमेरिकायाः प्रवासे डा. जयशङ्करः उक्तवान् यत् तस्य यात्रा सकारात्मकपूर्णा फलप्रदा चासीत्। सः अवदत् यत्, भारतस्य महत्त्वपूर्णः खनिज-क्षेत्र-सहयोगः अपि द्रुतगत्या प्रगतिं कुर्वन् अस्ति। सः इत्यपि अवदत् यत् आगामिदिनेषु सामरिकविषयेषु, रक्षायां, ऊर्जायां च तयोः संलग्नता भविष्यति ।

## सुभाषितम्

**धनं भक्तिमतां भक्तिः,**
**धनं योगो हि योगिनाम्।**
**विदुषां च धनं विद्या,**
**धनं शीलं हि योषिताम्।।**

भावार्थः- भक्त जनों के लिए ईश्वर भक्ति ही उनका सच्चा धन है, योगियों के लिए योग ही उनका सच्चा धन है। विद्वानों के लिए विद्या ही उनका धन है तथा महिलाओं के लिए सौम्य व्यवहार तथा शील ही उनका सच्चा धन है।


दैनिक ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263



सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य समुखे कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्


## एक-दशमलव चत्वारि-बिलियन-संख्याकानां भारतीयानां ऊर्जा-सुरक्षां सुनिश्चितं कर्तुं सर्वकारस्य सर्वोच्च-प्राथमिकता- भारतीयविदेशमन्त्रालयः

भारतम् अवदत् यत् एक-दशमलव चत्वारि-बिलियन-संख्याकानां भारतीयानां ऊर्जा-सुरक्षां सुनिश्चितं कर्तुं सर्वकारस्य सर्वोच्च-प्राथमिकता अस्ति । नवदेहल्यां प्रसारमाध्यमैः सह वार्तालापं कुर्वन् विदेशमन्त्रालयस्य प्रवक्ता रणधीर-जैस्वालः अवदत् यत् देशस्य ऊर्जा-स्रोतस्य विविधीकरणं सुनिश्चितं कर्तुं वस्तुनिष्ठ-विपणि-स्थित्याः, अन्ताराष्ट्रिय-गतिशीलतायाः च अनुसरणम् सर्वकारस्य कार्यनीत्याः केन्द्रबिन्दुः अस्ति । वेनेजुएला-देशस्य तैलविषये प्रश्नस्य प्रत्युत्तरं प्रयच्छन् जैस्वालः अवदत् यत् वेनेजुएला-देशः व्यापार-निवेश-ऊर्जाक्षेत्रे भारतस्य दीर्घकालीनसहभागी अस्ति ।

# सेशेल्स-राष्ट्रपतिः डॉ. पैट्रिक हर्मिनी पञ्चदिवसीय-भारतयात्रायाम्




सेशेल्स-गणराज्यस्य राष्ट्रपतिः डॉ. पैट्रिक हर्मिनी पञ्चदिवसीय-भारतयात्रायाः क्रमे चेन्नै नगरं प्राप्तवान्। गतदिने सः 'एस.आई.एम.एस.' (SIMS) चिकित्सालयस्य 'बालाजी दन्त-चिकित्सालयस्य' च निरीक्षणं कृतवान्।राष्ट्रपतिना सह तस्य पत्नी अपि भारतम् आगता अस्ति। अद्य सः तमिनाडु-राज्यस्य राज्यपालस्य आर. एन. रवि महोदयस्य मेलनं करिष्यति।फरवरी मासस्य सप्तम-दिनाङ्के सः राज्यपालं आचार्य देवव्रतम् मेलितुं मुंबई-नगरं प्रति प्रस्थानं करिष्यति।अन्ते सः देहली-नगरे भारतस्य राष्ट्रपतिना द्रौपदी मुर्मु महोदयया तथा प्रधानमन्त्रिणा नरेन्द्र मोदी महोदयेन सह द्विपक्षीय-विषयेषु चर्चां करिष्यति।राष्ट्रपति-पैट्रिक-हर्मिनी महोदयस्य इयं आधिकारिक-यात्रा भारत-सेशेल्स-राजनयिकसम्बन्धानां 'स्वर्णजयन्ती' उत्सवस्य उपलक्षे आयोजिता अस्ति।

# मेघालयस्य पूर्व-जयन्तिया-हिल्स मण्डले खनि-विस्फोटः, १८ जनानां मृत्युः



मेघालयराज्यस्य पूर्व-जयन्तिया-हिल्स मण्डले 'थांगस्को' क्षेत्रे गतगुरुवासरे प्रातः एकस्यां कोयला-खन्यां (अङ्गारखन्यां) भीषणविस्फोटः अभवत्, येन १८ जनानां मृत्युः सञ्जाता। बहवः श्रमिकाः अद्यापि खनेः अन्तः निमग्नाः सन्ति।

**विस्फोटस्य कारणम्:** आरक्षक-अधीक्षकः विकास कुमारः अकथयत् यत् प्रारम्भिक-सूचनानुसारं खनन-कार्ये प्रयुक्तस्य उच्च-तीव्रतायुक्तस्य 'डायनामाइट' द्रव्यस्य विस्फोटात् एषा दुर्घटना अभवत्।

विस्फोटस्य तीव्रतया समीपस्थाः खनि-नलिकाः (Shafts) ध्वस्तयः अभवन्, येन श्रमिकाः अगाधगम्भीरतायां निमज्जिताः। एकस्य जनस्य स्थितिः अतीव चिन्ताजनका आसीत्। प्रारम्भिक-अन्वेषणेन ज्ञातं यत् एषा खनिः अवैध-रूपेण प्रचलति स्म, या सुरक्षा-नियमानाम् 'रैट-होल' (Rat-hole) खनन-निषेधस्य च उल्लङ्घनं करोति।

## शोक-संवेदनाः अनुग्रह-राशिः च

प्रधानमंत्री नरेन्द्र मोदी अस्यां घटनायां दुःखं प्रकटयन् मृतानां परिवारजनानां प्रति संवेदनां व्यक्तवान्। सः निम्नलिखित-सहायतायाः घोषणाम् अकरोत्:।

**लाभार्थी सहायता राशिः (PMNRF)**

मृतकानां परिवारः २ लक्षं रूप्यकाणि

क्षतविक्षतानां कृते (घायलों के लिए) ५० सहस्रं रूप्यकाणि

मुख्यमन्त्री कॉनराड संगमा अपि घटनया दुःखितः सन् अस्य प्रकरणस्य उच्चस्तरीयान्वेषणाय आदेशं दत्तवान्। 'आपदा-प्रबन्धन' दलं उद्धार-कार्ये निरतं वर्तते।

# प्रधानमन्त्री अद्य 'परीक्षा पे चर्चा' कार्यक्रमे छात्रैः सह संवादं करिष्यति

प्रधानमंत्री नरेन्द्र मोदी अद्य प्रातः दशवादने 'परीक्षा पे चर्चा' इत्यस्य नवम-संस्करणे देशभरस्य छात्रैः सह वार्तालापं करिष्यति। अस्य कार्यक्रमस्य मुख्योद्देश्यं परीक्षा-तनावस्य निवारणं तथा परीक्षां 'उत्सव' रूपेण जीवनस्य महत्त्वपूर्णभागत्वेन स्वीकरणं च अस्ति।

## कार्यक्रमस्य प्रमुखाः बिन्दवः

सहभागिताः अस्मिन् वर्षे माईगॉव (MyGov) पटलमाध्यमेन सार्ध-चतुष्कोटिः (4.5 कोटिः) छात्राः, शिक्षकाः, अभिभावकाः च पञ्जीकरणं कृतवन्तः।

**संवादात्मक-सत्राणिः** अस्मिन् वर्षे देवमोगरा, कोयंबटूर, रायपुर, गुवाहाटी इत्यत्र तथा दिल्ली-नगरे प्रधानमन्त्री-आवासे 'एग्जाम वॉरियर्स' छात्रैः सह संवादः भविष्यति।

**प्रसारणम्:** अयं कार्यक्रमः दूरदर्शने, यू-ट्यूब (YouTube) वाहिन्यां, विभिन्नेषु ओटीटी (OTT) पटलेषु (यथा- अमेजॉन प्राइम, जियो, जी5) च सजीवं (Live) प्रसारितः भविष्यति।

## राष्ट्रिय-शिक्षा-नीतिः (NEP 2020) एवं उद्देश्यम्:

उद्देश्यम्: राष्ट्रिय-शिक्षा-नीति-२०२० (NEP 2020) अनुसारं छात्रेषु आत्मविश्वासस्य, सकारात्मकतायाः, सर्वाङ्गीण-कल्याणस्य च भावनां सुदृढीकरणम्।

# भारतीय-निर्वाचनायोगेन आगामि-विधानसभा-निर्वाचनार्थं सामान्य-आरक्षक-व्यय-पर्यवेक्षकाणां कृते एका प्रबोधन-सभा आयोजिता

भारतीय-निर्वाचनायोगेन असम, केरल, पुदुचेरी, तमिलनाडु, पश्चिमबङ्गाल चेत्यादिषु राज्येषु आगामि-विधानसभा-निर्वाचनार्थं केन्द्रीय पर्यवेक्षकरूपेण सामान्य-आरक्षक-व्यय-पर्यवेक्षकाणां कृते एका प्रबोधन-सभा आयोजिता । आयोगः अवदत् यत्, सामान्य-पर्यवेक्षकैः, आरक्षक-पर्यवेक्षकैः, व्यय-पर्यवेक्षकैः च सह शततः अधिकाः अधिकारिणः वार्तालापाय आहूताः आसन् । पर्यवेक्षकान् सम्बोधयन् मुख्य निर्वाचन आयुक्तः ज्ञानेश-कुमारः अवदत् यत् पर्यवेक्षकाः स्वतन्त्रं, निष्पक्षं, पारदर्शकं च निर्वाचनं सुनिश्चितं कुर्युः। श्रीकुमारः अवदत् यत् निर्वाचनस्थले तेषां उपस्थित्या चतुर्विंशत्यधिक-अष्टशतं निर्वाचनक्षेत्रेषु सम्पूर्ण निर्वाचन तन्त्रं ऊर्जापूरितं भविष्यति

# प्रधानमन्त्री नरेन्द्रमोदी फरवरीमासस्य सप्त-अष्ट-दिनाङ्कयोः मलेशियायाः प्रधानमन्त्रिणः अनवर अब्राहिम इत्यस्य निमन्त्रणे क्वालालम्पुरं गमिष्यति

प्रधानमन्त्री नरेन्द्रमोदी फरवरीमासस्य सप्त-अष्ट-दिनाङ्कयोः मलेशियायाः प्रधानमन्त्रिणः अनवर अब्राहिम इत्यस्य निमन्त्रणे क्वालालम्पुरं गमिष्यति । विदेशमन्त्रालयस्य सचिवः पी. कुमारन् वर्यस्य आगामि-यात्रायाः विषये वार्तालापं कुर्वन् अवदत् यत् प्रधानमन्त्रिणः मोदिनः मलेशिया-देशस्य एषा तृतीया यात्रा भविष्यति । प्रधानमन्त्री नरेन्द्रमोदी मलेशिया-देशस्य प्रधानमन्त्रिणा सह द्वैपाक्षिकीं चर्चा करिष्यति तथा च भारत-मलेशिया-समग्र-सामरिक सहभागित्वस्य अन्तर्गतं व्यापारः, रक्षा, सुरक्षा, सेमिकण्डक्टर्स, डिजिटल प्रौद्योगिकी, अक्षय ऊर्जा चेत्यादिषु प्राधान्य-क्षेत्रेषु प्रगतेः समीक्षां करिष्यति । यात्रावधौ दशमः भारत-मलेशिया-सी. ई. ओ. मञ्चः इति अपि निर्धारितः अस्ति। प्रधानमन्त्री मलेशिया-देशस्य विविधक्षेत्राणां प्रमुखैः सह अपि संवादं करिष्यति । कुमारन्-वर्यः अवदत् यत् मलेशिया-देशः आसियान्-देशेषु भारतस्य तृतीयः बृहत्तमः वाणिज्य-सहयोगी अस्ति, यस्य द्वैपाक्षिक व्यापारः प्रायः विंशति-बिलियन डालर-मितस्य अस्ति ।

# केन्द्रीय-गृह-सहकारिता-मन्त्री अमितशाहः भारतस्य प्रथमं सहकार्याधारितस्य भारत्-टैक्सी इति उपक्रमस्य आरम्भं कृतवान्



केन्द्रीय-गृह-सहकारिता-मन्त्री अमितशाहः आधिकारिकरूपेण नवदेहल्यां भारतस्य प्रथमं सहकार्याधारितस्य भारत-टैक्सी इति उपक्रमस्य आरम्भं कृतवान् । भारत-टैक्सी इति बहु-राज्य-सहकार समिति-अधिनियमः, इत्यस्य अन्तर्गतं पञ्जीकृतः भारतस्य प्रथमः सहकार-नेतृत्वभूतः उपक्रमः अस्ति । एषः मञ्चः शून्य-आयोगे, वृद्धि-मुक्त-मूल्यनिर्धारण-प्रतिमाने च कार्यं करोति, यत्र चालकानां कृते लाभस्य प्रत्यक्ष-वितरणम् भवति, येन वैदेशिक-निवेश-आधारित-समुच्चयक-मञ्चानां स्वादेशिकः विकल्पः प्रस्तूयते । जनसमूहं सम्बोधयन् श्री-शाह-वर्यः अवदत् यत् सर्वकारः टैक्सी सेवाक्षेत्रे न प्रविशति अपितु सहकारिक्षेत्राणि एव अस्मिन् प्रविशन्ति ।

# विद्यालयेषु छात्राणां मोबाइल-दूरभाष-प्रयोगे १ मार्चतः प्रतिबन्धः भविष्यति- मुख्यमन्त्री सुखविन्द्रसिंहः सुक्खुः



**हिमसंस्कृतवार्ताः-** बिलासपुरम्।मुख्यमन्त्री सुखविन्द्रसिंहः सुक्खूः बिलासपुर- जनपदे घुमारवीं- नगरे आयोजितायाः राष्ट्रिय- हस्तकन्दुक- प्रतियोगितायाः समापनावसरे उपस्थितं जनसमूहं सम्बोधयन् अवदत् यत् राज्य-सर्वकारः विद्यार्थिभ्यः गुणात्मक-शिक्षा-प्रदानार्थं अनेकान् क्रान्तिकारी-उपायान् स्वीकरोति, येन ते वैश्विकस्तरे स्पर्धां कर्तुं समर्थाः स्युः। सः अवदत् यत् राज्यसर्वकारः एतस्मिन् वर्षे १ मार्चात् अनन्तरं राज्यस्य सर्वेषु सर्वकारी- निजी- विद्यालयेषु चलदूरभाषेषु पूर्ण-प्रतिबन्धं स्थापयिष्यति, विद्यालयपरिसरे च दूरवाणी-आनयनस्य अनुमतिः न भविष्यति। सः अवदत्- यदि कस्यचित् विद्यार्थिनः समीपे मोबाइल- दूरभाषः लभ्यते, तर्हि तस्मै ५०० रूप्यकाणां दण्डः विधास्यते, मोबाइलः जप्तः भविष्यति, तस्य मातापितरौ विद्यालये आहूय सम्यक् उपदेष्येते। नियमस्य पुनः पुनः उल्लङ्घने सति निश्चित-मानक-कार्यविधेः (SOP) अन्तर्गतं अनुशासनात्मक-कार्यम् आचरिष्यते, यस्य कृते शिक्षाविभागः शीघ्रं मानक-प्रक्रियां निर्मास्यति। सः अवदत् यत् प्रायः दृश्यते- विद्यालयेषु मध्याह्न-भोजनकाले छात्राः मोबाइलप्रयोगे व्यस्ताः भवन्ति, येन ते अध्ययनाय मनः केन्द्रीकर्तुं न शक्नुवन्ति।सः अपि अवदत् यत् सर्वकार केवलं नव- विद्यालय- उद्घाटने न केन्द्रिता, अपि तु गुणात्मक- शिक्षायामेव विशेषं ध्यानं ददाति। सः अवदत्- अहं स्वयं सरकारी-विद्यालये अधीतवान् अस्मि, अतः विद्यालयेषु गुणात्मकशिक्षायाः कार्यान्वयनम् अत्यन्तावश्यकम्। मुख्यमन्त्री अवदत् यत् राज्य-सर्वकारः विद्यालयेषु क्रीडानां प्रोत्साहनं करिष्यति, छात्रान् प्रतियोगी-परीक्षाणां सिद्ध्यर्थम् अपि प्रेरयिष्यति। सः अवदत् यत् वर्तमानसर्वकारः प्रदेशे क्रीडा-पर्यटनस्य वर्धनार्थं प्रयत्नान् करोति, प्रत्येक संसदीयक्षेत्रे क्रीडाक्षेत्राणां निर्माणं करिष्यते।मुख्यमन्त्री अवदत् यत् अद्यतन-काले एशियाई- क्रीडायां भागं गृहीत्वा हिमाचलं प्रत्यागताः प्रदेशस्य पुत्र्यः रोजगारं प्राप्स्यन्ति। सः राष्ट्रिय- हस्तकन्दुक- प्रतियोगितायाः विजेतृ-हिमाचलप्रदेशदलाय २० लक्षरूप्यकाणां पुरस्कारराशिं दातुं घोषणाम् अकरोत्। सः अवदत्- क्रीडाभ्यः प्रदेशस्य युवेषु अनुशासनस्य, आत्मविश्वासस्य, नेतृत्व-क्षमतायाः च विकासः भवति; अतः सर्वकारः क्रीडानां प्रोत्साहनार्थं निरन्तरं प्रयत्नशीलास्ति। राज्यसर्वकार क्रीडकानाम् आहार- भत्ताम् (डाइट-मनी) अपि वर्धितवती।ठाकुरः सुखविन्द्रसिंहः सुक्खूः अवदत् यत् राज्यसर्वकारः क्रीडकानां आवश्यकतानां विशेषं ध्यानं करोति। सः अवदत्- सर्वकारया राज्ये ४०० रूप्यकाणि, राज्यात् बहिः ५०० रूप्यकाणि आहार- भत्तारूपेण प्रदीयन्ते, राज्यात् २०० किलोमीटराणां परे प्रतियोगितायां भाग-ग्रहणे वायुमार्ग-सेवायाः सुविधाऽपि प्रदीयते।मुख्यमन्त्री तकनीकी- शिक्षामन्त्री राजेश-धर्माणिं प्रशंसन् अवदत् यत् क्रीडासु तस्य विशेषा रुचिः आसीत्, तस्मात् एव सः घुमारवीं-नगरे राष्ट्रिय-हस्तकन्दुक- चैम्पियनशिप- आयोजनस्य निर्णयं कृतवान्। सः अवदत् यत् घुमारवीं-नगरे आन्तरिक- स्टेडियमस्य निर्माणकार्यं शीघ्रं सम्पन्नं भविष्यति। अपि च घुमारवीं-विद्यालय-भवनस्य निर्माणं एकवर्षस्य अन्तर्गतम् सम्पन्नं कर्तुं प्रयासः क्रियते। सः अवदत् यत् मोरसिंगी-स्थाने कन्या-छात्रावासस्य निर्माणम् अपि क्रियिष्यते।६९तमायाम् अधीन- १९ छात्रा- हस्तकन्दुक- विद्यालय-प्रतियोगितायाः अन्तिम- प्रतिस्पर्धायाम् हिमाचलप्रदेशदलेन राजस्थानदलं पराजितम्। हरियाणादलं तृतीयस्थाने स्थितम्। अस्यां प्रतियोगितायां देशस्य विविध-भागेभ्यः आगतानि ३० दलानि सहभागीभूताः। मुख्यमन्त्री विजेता-उपविजेता- दलान् सम्मानितवान्।

अस्मिन् अवसरे शिक्षामन्त्री रोहितठाकुरः, तकनीकी- शिक्षामन्त्री राजेश धर्माणी, पूर्व-विधायकौ बंबर ठाकुरः, तिलकराजशर्मा, जिला-काङ्ग्रेस- अध्यक्षा अञ्जना- धीमान, काङ्ग्रेसनेता विवेककुमारः, एपीएमसी- बिलासपुर- अध्यक्षः सतपाल वर्धनः, उच्चशिक्षानिदेशकः अमरजीत शर्मा, विद्यालय- शिक्षा- निदेशकः आशीष कोहली, उपायुक्तः राहुल कुमारः, एसपी सन्दीप धवलः तथा अन्ये गणमान्याः व्यक्तयः उपस्थिताः आसन्।

# जनगणना २०२७ इत्यस्यै राज्ये स्वीकृतिः, ३३ प्रमुखसूचनाः द्वारे द्वारे एकत्रिताः भविष्यन्ति




**हिमसंस्कृतवार्ताः - शिमला।** हिमाचलप्रदेशे २०२७ भारतस्य जनगणनायाः सज्जता आरब्धा अस्ति । राज्यसर्वकारेण गृहसूचीगृहगणनाविषये आधिकारिकसूचना कृता अस्ति। एषा सूचना प्रारम्भिकजनगणनाप्रक्रियायाः हरितप्रकाशं ददाति । राज्यपालेन निर्गतायाः अधिसूचनानुसारं केन्द्रसर्वकारस्य अधिसूचना हिमाचलप्रदेशस्य ई-राजपत्रे जनगणनानियम, १९९० इत्यस्य नियमः ८ अन्तर्गतं प्रकाशिता अस्ति। जनगणना २०२७ इत्यस्य कृते नियुक्ताः जनगणनापदाधिकारिणः राज्यस्य नगरीयग्रामीणक्षेत्रेषु द्वारं द्वारं गत्वा गृहपरिवारस्य सूचनां संग्रहयिष्यन्ति। अस्मिन् क्रमे प्रत्येकस्य गृहस्य विषये विशिष्टप्रश्नानां आधारेण विवरणानि एकत्रितानि भविष्यन्ति।जनगणनायां कुल ३३ वस्तूनाम् विवरणं अभिलेखितं भविष्यति, यत्र परिवारस्य सदस्यानां संख्या, परिवारस्य प्रमुखस्य नाम, लिङ्गं, सामाजिकवर्गः च सन्ति जनगणनायाः कृते एकः मोबाईलसङ्ख्या अपि संगृहीता भविष्यति, यस्य उपयोगः केवलं आधिकारिकसूचनार्थं भविष्यति। सर्वकारस्य मते जनगणनाद्वारा एकत्रिता सूचना हिमाचलप्रदेशे भविष्यत्परियोजनानां, विकासपरियोजनानां, आवासस्य, पेयजलस्य, मार्गस्य, स्वास्थ्यस्य, शिक्षायाः, अन्येषां आधारभूतसंरचनानां योजनायां महत्त्वपूर्णां भूमिकां निर्वहति। सम्पूर्णा प्रक्रिया जनगणनाकानून, १९४८ इत्यस्य प्रावधानानाम् अन्तर्गतं भविष्यति, एकत्रिता सूचना च सख्यं गोपनीयं भविष्यति।

## एते विषयाः केन्द्रीकृताः भविष्यन्ति

जनगणनायाः समये गृहसंरचना, तस्य उपयोगः, गृहं मृत्तिकायाः वा वज्रचूर्णस्य वा, स्वामित्वस्य स्थितिः, पेयजलस्य सुविधा, विद्युत्संयोजनं, शौचालयः, पाकशाला, पाकस्य इन्धनं, अन्तर्जालप्रवेशः, मोबाईलफोनः, वाहनानि च इत्यादीनां विषयेषु सूचनाः एकत्रिताः भविष्यन्ति।

# बिलासपुरे छात्राणां 'डिजिटल-गुरुः' भविष्यति एआई (AI); मुख्यमन्त्रिणा 'पढ़ाई विद एआई' इति अनुप्रयोग-माध्यमस्य शुभारम्भः कृतः

**हिमसंस्कृतवार्ताः - बिलासपुरम्।** मुख्यमन्त्री सुखविन्दरसिंहसुक्खूः 'बरठीं' इत्यत्र बिलासपुर-जनपद-प्रशासनस्य अभिनव-प्रारम्भ-स्वरूपस्य 'पढ़ाई विद एआई' इति प्रकल्पस्य विधिवत् शुभारम्भं कृतवान्। अयं 'एआई' (AI) आधारितः डिजिटल-शिक्षण-मञ्चः विशेषरूपेण बिलासपुर-जनपदस्य तेभ्यः छात्रेभ्यः आरब्धः, ये विविधानां प्रतियोगि-परीक्षाणां (Competitive Exams) सज्जतां कुर्वन्तः सन्ति।

## शिक्षा भविष्यं परिष्कर्तुं सर्वाधिकं सशक्तं साधनम् - मुख्यमंत्री

अस्मिन् अवसरे मुख्यमन्त्री अवदत् यत् शिक्षा केवलं पाठ्यक्रम-पूर्तेः माध्यमं नास्ति, अपितु एषा समानाय नूतन-दिशां दातुं, चिन्तनस्य विस्तारं कर्तुं तथा च आगामि-सन्ततीनां भविष्यं परिष्कर्तुं सर्वाधिकं सशक्तं साधनं वर्तते।

सामाजिक-परिवर्तनम्: शिक्षां सामाजिक-परिवर्तनस्य प्रभावी-माध्यमं मत्वा राज्यसर्वकारः निरन्तरं नूतन-प्रयोगान् (Innovation) शिक्षायाः समान-अवसरान् च सुनिश्चितं कुर्वन् अस्ति।

सः अवदत् यत् 'पढ़ाई विद एआई' छात्राणां उज्ज्वल-भविष्यस्य दिशि एकः सुदृढः दूरदर्शी च पदक्षेपः अस्ति।




## प्रकल्पस्य वैशिष्ट्यम्

अस्य डिजिटल-मञ्चस्य माध्यमेन सर्वेभ्यः छात्रेभ्यः शिक्षणस्य समानाः अवसराः प्राप्स्यन्ते। अस्मिन् पूर्णतया डिजिटल-शिक्षण-व्यवस्था सुनिश्चितं कृता अस्ति, यत्र निरन्तरं शैक्षणिक-परामर्शस्य (Academic Counseling) सुविधा अपि उपलब्धा भविष्यति।बिलासपुरस्य उपायुक्तः (DC) राहुल कुमारः अवदत् यत् 'एनटीपीसी' (NTPC) इत्यस्य सहयोगेन 'पढ़ाई विद एआई' इति माध्यमेन छात्रेभ्यः आधुनिक-तन्त्रांश-आधारित-गुणवत्तापूर्ण-शिक्षण-सुविधाः प्रदास्यन्ते।

# केन्द्रेण हिमाचलस्य आयव्ययके न्यूनता न कृता,
## काङ्ग्रेस- सर्वकारः भ्रमं विरमताम्- अनुरागसिंहठाकुरः



**हिमसंस्कृतवार्ताः- शिमला।** दिल्ली-नगरे गुरुवारे हिमाचलप्रदेशस्य सांसदानां प्रतिनिधिमण्डलेन पत्रकारवार्ता आहूता। अस्य प्रतिनिधिमण्डलस्य नेतृत्वं हमीरपुर- संसदीय- क्षेत्रस्य सांसदः अनुरागसिंहठाकुरः अकरोत्। अस्मिन् प्रतिनिधिमण्डले शिमला-संसदीय-क्षेत्रस्य सांसदः सुरेश कश्यपः, काङ्गड़ा- संसदीयक्षेत्रस्य सांसदः राजीव भारद्वाजः, राज्यसभासांसदौ हर्ष महाजनः, सिकन्दरकुमारश्च उपस्थिताः आसन्। सांसदाः प्रेसवार्तायां करहस्तान्तरणम्, वित्त- आयोगस्य परिणामान्, आधारभूत- संरचना- परियोजनाः, नव-केन्द्रीयसंस्थाः च इत्यादिषु केन्द्रस्य हिमाचल-सहायतायाः प्रमाणानि पटलं समक्षं न्यदधुः।
अनुरागसिंहठाकुरः अवदत् यत् २०१४ तः अद्यावधि केन्द्रसर्वकारेण हिमाचलप्रदेशाय उदारतया सहायता प्रदत्ता। यूपीए-शासनकाले हिमाचलात् यः विशेषराज्यस्तरः अपहृतः आसीत्, सः मोदिना पुनः हिमाचलाय प्रदत्तः। काङ्ग्रेसः जनान् भ्रमयितुं प्रयतते।
यदि २००४ तः २०१४ पर्यन्तं यूपीए-सर्वकारस्य काले केन्द्रीय-कराणां मध्ये हिमाचलस्य अंशः गण्यते, तर्हि सः केवलं १२,६३९ कोटि-रूप्यकाणि आसीत्; परन्तु मोदी-सर्वकारस्य २०१४ तः २०२६ पर्यन्तं सः वृद्धिं प्राप्य ७६,७९९ कोटि-रूप्यकाणि अभवत्। यूपीए-काले केन्द्रात् हिमाचलाय कृतानुदानस्य राशिः ५०,२९८ कोटि-रूप्यकाणि आसीत्, या २०१४ तः २०२४ पर्यन्तं मोदी सर्वकारस्य काले १.४१ लक्ष-कोटि-रूप्यकाणि पर्यन्तं वर्धिता। नव- वित्त- आयोगस्य सूत्रानुसारं संघीयकराणां शुद्ध- अंशे हिमाचलस्य भागः ०.८३० प्रतिशततः वर्धित्वा षोडश-वित्त-आयोगस्य अन्तर्गतं ०.९१४ प्रतिशतः अभवत्, यत् संरचनात्मक-वृद्धिं दर्शयति। प्रधानमन्त्री ग्राम-सड़क- योजनायाः (PMGSY) अन्तर्गतं वित्तवर्षे २००४–०५ तः २०१३–१४ पर्यन्तं हिमाचलाय प्रदत्ता केन्द्रीय-धनराशिः १,५४९.१५ कोटि-रूप्यकाणि आसीत्, या वित्तवर्षे २०१४–१५ तः २०२५–२६ पर्यन्तं ६,८९५.८९ कोटि-रूप्यकाणि अभवत्। अनुरागः अवदत्- वयं सर्वे सांसदाः स्वपक्षात् हिमाचलस्य मुख्यमन्त्रिणं काङ्ग्रेससर्वकारं च निवेदयामः यत् भवन्तः दिल्लीम् आगच्छन्तु। ये उच्च- ब्याजदरेण ऋणानि गृहीतानि, तेषां ब्याज-दर- न्यूनतायै, हिमाचलस्य भारनिवारणाय वित्त-मन्त्रालयेन सह बैठकं कर्तुं वयं सज्जाः स्मः। अस्माकं हिमाचलः प्रियः अस्ति। आरोप-प्रत्यारोप- राजनीतिं विहाय सुधाराः क्रियन्ताम्; वयं सर्वथा सहयोगाय सिद्धाः स्मः। अनुरागः पुनरपि अवदत् यत् पर्वतीय-राज्येषु पूंजीगत- सहायतायां केन्द्रस्य दृष्टिकोणः परिवर्तितः। राज्येभ्यः पूंजीनिवेशाय विशेष- सहायतारूपेण ब्याजरहितं पञ्चाशत्वर्षीयं ऋणं प्रदत्तम्। वित्तवर्षे २०२०–२१ तः जनवरी २०२६ पर्यन्तं हिमाचलाय प्रायः ८,३०९ कोटि-रूप्यकाणि प्रदत्तानि, यत् पूर्वकाले न आसीत्। वित्त- आयोग- संबद्धाः स्थानीय-निकायानां अनुदानानि अपि हिमाचलाय महत्त्वपूर्णतया वर्धितानि। विशेषतः ग्रामीण-स्थानीय-निकायानां कृते षोडश- वित्त- आयोगे ३,७४४ कोटिरूप्यकाणि प्रदत्तानि, यानि पञ्चदश-वित्त- आयोगस्य १,६७३ कोटि-रूप्यकाणां प्रायः द्विगुणानि सन्ति।

# 'काङ्ग्रेस-शासित-राज्येन स्वयं RDG स्थगनस्य याचना कृता',
## जयरामठाकुरः मुख्यमन्त्रिणे १५-तम-वित्त-आयोगस्य संस्तुतिं स्मारितवान्



हिमसंस्कृतवार्ताः - शिमला। हिमाचलप्रदेशस्य विपक्षस्य नेता जयरामठाकुरः राजस्व-हानि-अनुदानस्य (Revenue Deficit Grant) विषये काङ्ग्रेस-दलं प्रति तीक्ष्ण-प्रहारं कृतवान्। सः अवदत् यत् काङ्ग्रेस-पक्षः अस्मिन् संवेदनशील-विषये केवलं राजनैतिक-लाभं प्राप्तुं प्रयतते तथा च प्रदेशस्य जनतां भ्रामयति। वास्तविक-तथ्यानि निगुह्य (छिपाकर) केन्द्रसर्वकारस्य उपरि आरोप-प्रत्यारोपाः काङ्ग्रेस-पक्षस्य पुरातनी रीतिः अस्ति।

**जयरामठाकुरस्य मुख्यारोपाः**

१. कर्नाटकस्य सन्दर्भः - जयरामठाकुरः उक्तवान् यत् काङ्ग्रेस-नेतृभिः प्रथमं स्पष्टीकरणीयं यत् काङ्ग्रेस-शासित-राज्येन कर्नाटकेन स्वयं राजस्व-हानि-अनुदानं स्थगयितुं प्रस्तावः दत्तः आसीत्। यदा तस्यैव दलस्य राज्यानि एतादृशीं याचनां कुर्वन्ति, तदा हिमाचलस्य मुख्यमन्त्री अस्मिन् तथ्ये किमर्थं मौनं धरति?

२. १५-तम-वित्त-आयोगस्य सङ्केतः - सः अवदत् यत् १५-तमे वित्त-आयोगे पूर्वमेव स्पष्टं कृतं यत् भविष्ये आरडीजी-व्यवस्था क्रमिकरूपेण (Phase-wise) समाप्स्यते। तस्मिन् समये वर्तमान-मुख्यमन्त्री सुखविन्दरसिंहसुक्खूः विधानसभायां विधायकः आसीत्, अतः सः सर्वं जानाति स्म।

### वित्तीय-कुप्रबन्धनस्य आरोपः

नेता प्रतिपक्षः अवदत् यत् आरडीजी-विषये असत्यं भयं भ्रमं च प्रसार्य काङ्ग्रेस-सर्वकारः स्वस्य वित्तीय-कुप्रबन्धनं (Financial Mismanagement) तथा प्रशासनिक-वैफल्यं गोपयितुं इच्छति। वित्त-आयोगस्य संस्तुतयः एकस्याः दीर्घकालिक-संरचनायाः अन्तर्गतं भवन्ति, यस्य सङ्केताः राज्येभ्यः पूर्वमेव दीयन्ते।
जयरामठाकुरः काङ्ग्रेस-सर्वकारं परामर्शं दत्तवान् यत् सः राजनैतिक-भाषणानि त्यक्त्वा प्रदेशस्य वित्तीय-स्थितिं सुदृढां कर्तुं ठोस-पदक्षेपान् स्वीकुर्यात्। केन्द्रस्य उपरि निष्प्रयोजनं आरोपान् विसृज्य स्वकीयानां आर्थिक-नीतीनां व्यय-प्रबन्धनस्य च उत्तरं ददातु।

# शास्त्रोक्तं सुवाक्यम्- ०२



असमप्रदेशीयः विज्ञानशिक्षकः, नारदोपाध्यायः

## १) अहिंसा परमो धर्मः।

शरीरेण, मनसा, वचसा, कर्मणा, भावनया च न कस्यापि हिंसा करणीया, इत्येव मनुष्यस्य श्रेष्ठः धर्मः उच्यते ।

## २) आतुरे नियमो नास्ति।

स्वाभाविक-परिस्थित्यां, सुस्थावस्थायां वा सनिष्ठं नियमानां पालनम् अवश्यं कल्याणकामिभिः क्रियते। परन्तु विपत्काले, यदा मनः शोकदुःखादिभिः विषण्णतां गच्छति, तदा पूर्ववत् नियमानां पालनं तेषां कृते न सम्भवति, तत्र नियमभङ्गनस्य दोषोऽपि न बाधते।

## ३) इन्द्रियवशवर्ती चतुरङ्गवानपि विनश्यति।

चतुरङ्गसेनया आवृतः कश्चन जितेन्द्रियः पुरुषोऽपि कदाचिद् आपदि निपतति, नश्यति वा। तस्माद् अहङ्कारो मास्तु।

## ४) उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः।

श्रेष्ठजनानाम् उद्योगिनां पार्श्वे हि लक्ष्मीः, अर्थात् धनवैभवं निवसति, न तु निष्कर्मिणाम्, अलसानां वा पार्श्वे।

## ५) एकश्चन्द्रः तमो हन्ति न च तारागणैरपि।

कस्यचन स्थानस्य प्रकाशनाय एक एव दीपकः पर्याप्तः। अन्येषां दीपकानां तावद् आवश्यकता न भवति। यथा, एक एव चन्द्रः समस्तां भूमिं प्रकाशयति, तदर्थमत्र आकाशे स्थितानां कोटिशः ताराणाम् आवश्यकता नास्ति। तद्वत् एको हि पुत्रः, सुजनः वा परिवारं, जनसमाजं वा विकासोन्मुखं कर्तुं शक्नुयात्, परं बहूनाम् इतरेषां दुष्प्रभानां, दुर्मतीनां वा अत्र का नु आवश्यकता इत्याशयः।

## ६) कार्यान्धस्य प्रदीपो मन्त्रः।

यः किङ्कर्तव्यविमूढः, तस्य कृते सामान्यं मार्गदर्शनं, हितोपदेशो वा अन्धकारस्य निवारणाय, प्रज्ज्वलितायाः प्रदीपशिखायाः इव कार्यं करोति।

## ७) गुरूणां माता गरीयसी।

जगति गुरवो बहवः उपलभ्यन्ते। परं प्रायशः गुरवः स्वार्थोपेताः। परन्तु जगति एकमात्रः गुरुः वर्तते, या निस्वार्थतया सततं सन्ततीनां हिताय प्रवर्तते, सा हि माता। स्वसन्तत्यर्थं सा शिक्षा-दीक्षा- पालन- पोषणादिकं सर्वं सेवाकार्यं निस्वार्थतया आचरति, तस्मादेव सा सदैव 'गुरूणामपि गरीयसी' इत्युच्यते।

## ८) चित्ते वाचि क्रियायां च साधूनाम् एकरूपता।

सज्जनपुरुषः मनसा यत् चिन्तयति, मुखेन यद् वदति, तादृशं हि कार्यं करोति, न वा असाधुजनः। अर्थात् तस्य चिन्तनं, वचनं, कार्यं चेति न कदापि भिन्नं भवति, अपितु समं भवति।

## ९) चिन्ता ज्वरो मनुष्याणाम्

चिन्ता मनुष्यस्य प्रधानः रोगः। रोगोऽयम् अत्यन्तं कष्टदायको व्याधिः कथ्यते। सुचिन्तनाभ्यासेन एव अस्य शमनं भवति, न वा अन्यैः औषधैः।

## १०) चन्दनं न वने वने।

चन्दनवृक्षः यत्र तत्र नोपलभ्यते। विशेषस्थानेषु हि सः कथञ्चिदुपलभ्यते। तद्वत् हितैषी, सज्जनपुरुषोऽपि न सर्वत्रोपलभ्यते, सौभाग्यबलात् हि तादृशेन सह कदाचित् प्रीतिमेलनं सम्भवतीति। (क्रमशः)

# विद्याधनधर्मसुखानां सम्बन्धसमीक्षा




डॉ विमलेश झा, डीएवी पब्लिक स्कूल, बरारी,भागलपुर, बिहार

भारतीयदर्शनपरम्परायां मानवजीवनस्य परमलक्ष्यं सुखप्राप्तिः इति सामान्यजनानां धारणा दृश्यते। किन्तु तस्य सुखस्य स्वरूपं, साधनं च यदा विवेच्यते तदा ज्ञायते यत् सुखं न भोगप्रधानं, न च केवलं ऐहिकसम्पत्तिजन्यं; अपि तु तद् धर्मजन्यं, संस्कारजन्यं च भवति। अस्य एव तत्त्वस्य सूक्ष्मं, किन्तु अत्यन्तं प्रभावशालिनं प्रतिपादनं प्राचीनसुभाषिते दृश्यते—

**"विद्या ददाति विनयं**
**विनयाद् याति पात्रताम्।**
**पात्रत्वाद् धनमाप्नोति**
**धनाद् धर्मः ततः सुखम्॥"**

अस्य श्लोकस्य गाम्भीर्यं केवलं पदानां सौन्दर्ये न, अपि तु तत्त्वार्थे निहितम् अस्ति। विशेषतः "धनात् सुखम्" इति वाक्यस्य सामान्यव्याख्या बहुधा भ्रमजन्याऽस्ति। अत्र स्पष्टं प्रतिपाद्यते—धनात् साक्षात् सुखं न जायते, अपि तु धनात् धर्मः जायते, तस्मात् एव सुखम् उत्पद्यते। अयं भावः अस्मिन् निबन्धे विस्तारतः विवेच्यते। निबन्धस्य आरम्भे विद्यायाः महत्वं विचार्यते। विद्या न केवलं पुस्तकीयज्ञानरूपा, न केवलं उपजीविकासाधनम्; अपि तु सा मानवस्य अन्तःकरणस्य संस्कारकर्त्री अस्ति। विद्या मनुष्यं विवेकशीलं करोति, तस्य अहङ्कारं शमयति, तस्मै यथार्थदृष्टिं ददाति।"सा विद्या या विमुक्तये"इति उपनिषद्वचनं विद्यास्वरूपं स्पष्टयति। विद्यया मनुष्यः आत्मस्वरूपं, कर्तव्यं, समाजे स्वस्थानं च अवगच्छति। अज्ञानजन्यः अहङ्कारः विद्यानाशेन विनश्यति, तत्र एव विनयस्य जन्म भवति। श्लोके द्वितीयं पदं"विद्या ददाति विनयम्"अत्यन्तं सूक्ष्मार्थं बोधयति। विनयः केवलं नम्रता न, अपि तु आत्मसंयमः, शिष्टाचारः, गुरुजनसम्मानः, समाजे मर्यादापालनं च भवति। विनययुक्तः पुरुषः न स्वकीयज्ञानं प्रदर्शनार्थं प्रयुङ्क्ते, न च अन्यान् तिरस्करोति। विनयात् एव पात्रता जायते। विनयरहितः विद्वान् अपि समाजे अप्रियः भवति, विनययुक्तः अल्पविद्वान् अपि पूज्यः भवति। अतः पात्रता न जात्या, न धनसंपत्त्या, अपि तु गुणैः एव निर्धार्यते। पात्रता एव धनस्य हेतुर्भवति।"विनयाद् याति पात्रताम्"इति चरणे पात्रतायाः गाम्भीर्यं सूचितम्। पात्रता नाम किम्? सा योग्यतासहितं विश्वासयोग्यत्वम्। यः पुरुषः पात्रः भवति, तस्मिन् समाजः विश्वासं करोति, संस्थाः तस्मै दायित्वं ददति, राज्यं सम्मानं ददाति। धनं न आकस्मिकं, न भाग्यजन्यं केवलम्; बहुधा पात्रताया फलरूपेण एव आगच्छति। उद्योगे, शिक्षाक्षेत्रे, प्रशासनक्षेत्रे सर्वत्र पात्रता एव समृद्धेः मूलं भवति। अत्र एव श्लोकस्य सर्वाधिकं विवादास्पदं, किन्तु तात्त्विकं चरणं आगच्छति"पात्रत्वाद् धनमाप्नोति"। धनं साधनम्, न साध्यम्। भारतीयदर्शनं धनं पुरुषार्थचतुष्टयस्य अन्तर्गतं न स्वीकरोति; किन्तु अर्थः धर्मस्य अनुगतः भवति। धनस्य स्वरूपं यदि विवेकयुक्तं न भवति, तर्हि तत् बन्धनकारणं भवति। किन्तु यदा धनं धर्मानुगतं, संयमयुक्तं च भवति, तदा एव तत् समाजकल्याणाय साधनं भवति।अत्र निर्णायकः बिन्दुः धनात् सुखं न इति। अत्र एव श्लोकस्य सारः निहितः"अत्र धनात् सुखं न, धनाद् धर्मः भवति" एषः वाक्यार्थः अत्यन्तं सूक्ष्मः। सामान्यजनाः मन्यन्ते "यस्य धनं, तस्य सुखम्।" किन्तु अनुभवसाक्ष्येण, शास्त्रसाक्ष्येण च एषा धारणा मिथ्या सिद्धा।धनवन्तः अपि बहवः दुःखिनः दृश्यन्ते चिन्तया, भयेन, असन्तोषेन, असुरक्षाभावेन च। धनं यदि सुखस्य प्रत्यक्षकारणं स्यात्, तर्हि सर्वे धनिनः सुखिनः स्युः; किन्तु तथा न दृश्यते।

धनं यदा धर्मकार्ये नियोज्यते दानाय, सेवायै, शिक्षायै, आरोग्याय, समाजोत्थानाय तदा तस्य आन्तरिकः परिणामः भवति चित्तप्रसादः। अयं चित्तप्रसादः एव वास्तविकं सुखम्।

"धर्म एव हतो हन्ति धर्मो रक्षति रक्षितः"। धर्मः मनुष्यं अन्तर्बहिः उभयतः रक्षति। धर्माचरणेन मनसि अपराधबोधः न भवति, आत्मगौरवं वर्धते, समाजस्य आशीर्वादः लभ्यते।अत्र अस्माभिः सुखस्य आध्यात्मिकस्वरूपम् अपि पश्यामः। सुखं न केवलम् इन्द्रियजन्यं भवति। इन्द्रियसुखं क्षणिकं, तृष्णावर्धकं, दुःखानुबन्धि च भवति। धर्मजन्यं सुखं तु स्थायी, शान्तिप्रदं, अन्तःकरणस्पर्शि च भवति।उपनिषत्सु उक्तं—"न वित्तेन तर्पणीयो मनुष्यः"अर्थात् धनैः मनुष्यस्य मनः तृप्तिं न यास्यति। तृप्तिः केवलं धर्मेण, सन्तोषेन, विवेकेन च लभ्यते।

सामाजिकजीवने अपि अस्य श्लोकस्य प्रासङ्गिकता महत्वपूर्णा विद्यते। आधुनिकसमाजे धनकेन्द्रितजीवनदृष्टिः वर्धमाना दृश्यते। बाल्यकालादेव "जीविकोपार्जनेन अधिकम् धनम् आवश्यकम् " इति शिक्ष्यते, किन्तु "कथं उपयोगः करणीयः" इति न शिक्ष्यते। फलतः धनवृद्धिः भवति, किन्तु सुखवृद्धिः न। यदि अस्य श्लोकस्य तत्त्वं शिक्षाव्यवस्थायां, प्रशासनव्यवस्थायां, व्यक्तिगतजीवने च आचरितं स्यात्, तर्हि समाजे नैतिकता, शान्तिः, विश्वासः च वर्धेत। अतः स्पष्टं निष्कर्षरूपेण वयं वक्तुं शक्नुमो यत् विद्या विनयं जनयति,विनयः पात्रतां जनयति,पात्रता धनं जनयति,धनं स्वयमेव सुखं न जनयति,धनात् धर्मः जायते,धर्मात् एव वास्तविकं, शाश्वतं सुखं जायते।अतः श्लोकस्य केन्द्रीयभावः"धनं न सुखस्य कारणम्,धर्मः एव सुखस्य कारणम्,धनं तु धर्मस्य साधनम् अस्ति।"एवमेव भारतीयजीवनदृष्टिः मानवजीवनं केवलं भोगाय न, अपि तु धर्माय, समाजाय, आत्मकल्याणाय च नियोजयति। एषा एव शाश्वती जीवनदृष्टिः, या नित्यसुखस्य मार्गं दर्शयति।




## "लौकिकन्यायकोशः"
## "यथासंख्यन्यायः"

एकस्मिन् एव वाक्ये एकसंख्यकम् उद्देश्यं विधेयं भवतः चेत् प्रथमस्य उद्देश्यस्य प्रथमेन विधेयेन द्वितीयस्य द्वितीयेन, तृतीयस्य च तृतीयेन इति कश्चन् अन्वयक्रमः भवति। यथा- त्वम् अरिं मित्रं सङ्कटं च जय रञ्जय सहस्व च। इत्युक्ते यथाक्रमम् अरिं जय, मित्रं रञ्जय, सङ्कटं च सहस्व इति अन्वयः भवति।

'यथासङ्ख्यम् अनुदेशः समानम्' इति पाणिनिकृतं सूत्रम् अस्ति {१-३-१०}, एतस्य न्यायस्य उपयोगः 'टा ङसि ङ्साम् इनात्स्याः' इति पाणिनिसूत्रे {७-१-१२} भवति। टा-ङसि इति प्रत्ययानां स्थाने इन-आतक्ष स्यक्ष इत्येते भवन्ति इत्युक्ते यथाक्रमं टास्थाने इनादेशः, ङसिस्थाने आत्प्रत्ययः, ङसस्थाने च स्य इति आदेशाः भवन्ति इति भावः।

डा. वर्षा प्रकाश टोणगांवकर
पुणे/ महाराष्ट्रम्




## वार्ता-संवादः

नन्दिनी- नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।

काव्या- नमस्ते नन्दिनि। श्रूयताम्, अद्य मया एका विचित्रा वार्ता श्रुता। अमेरिका-देशीयाभिः स्त्रीभिः सौन्दर्याय मृत-शरीराणां वसा स्वीकृता। एतत् तु घोरम्।

नन्दिनी- अहो, बीभत्सम् एतत्! अन्यस्मिन् विषये, एकेन अमेरिका-यात्रिकेण भारतीयाः "अलसाः" इति निन्दिताः। तेन उक्तं यत् अस्माकं कायस्थैर्यं नास्ति।

काव्या- सः मिथ्यावादी। किन्तु दृश्यताम्, एकेन बालकेन "लघु-चलचित्र" (Reel) निर्माणाय स्वमुखम् एव प्रज्वालितम्। तस्य मुखं दग्धम्।

नन्दिनी- सर्वथा मूर्खता खलु। अन्तिमे, एकेन नव-कर्मचारिणा कार्यालयस्य कठोराः नियमाः निराकृताः। तस्य साहसिकम् उत्तरं जनैः श्लाघितम्।

# संयुक्तराष्ट्र-महासचिवेन भारतस्य नेतृत्वस्य प्रशंसा कृता

संयुक्तराष्ट्र-महासचिवः एंतोनियो गुटेरश महोदयः 'आर्टिफिशियल इंटेलिजेंस' (AI - कृत्रिमप्रज्ञा) इत्यस्य वैश्विकशिखरसम्मेलनस्य आयोजनाय भारतस्य नेतृत्वस्य श्लाघां कृतवान्। सः अवदत् यत् अन्ताराष्ट्रिय-सम्बन्धानां क्षेत्रे एआई-तकनीकी महतीं भूमिकां निर्वहति। वेगात् वर्धमानस्य अस्य तन्त्रज्ञानस्य आव्हानानां अवसराणां च विश्लेषणाय सर्वेषां देशानां सहयोगः आवश्यकः अस्ति।

भारत एआई इम्पैक्ट सम्मेलनम् – २०२६। तिथिः: १६ तः २० फरवरी २०२६ पर्यन्तम्।। स्थानम्: नवदेहली।

प्रधानमन्त्रिणा नरेन्द्रमोदी महोदयेन फ्रान्स-देशस्य 'एआई एक्शन' सम्मेलने अस्य घोषणा कृता।

विकासशील-अल्पविकसितदेशेषु आयोजितं प्रथमं वैश्विकं एआई-सम्मेलनम् इदमस्ति।

जनाः, ग्रहः, प्रगतिः च (People, Planet, and Progress)।

महासचिवः गुटेरशः 'भविष्य-शिखर-२०२४' सम्मेलने स्वीकृतस्य 'वैश्विक-डिजिटल-समझौते' (Global Digital Compact) इत्यस्य परिणामानां चर्चां करिष्यति।

### प्रमुखबिन्दवः

अन्ताराष्ट्रिय-वैज्ञानिक-पैनलम्: कृत्रिमप्रज्ञायाः (AI) वैज्ञानिकबोधं सुदृढं कर्तुं तथा नीतिगतचर्चाः साक्ष्य-आधारिताः कर्तुं एकस्य स्वतन्त्रस्य वैज्ञानिकपैनलस्य स्थापना अस्य मुख्यमुद्देश्यम् अस्ति।

गुटेरस महोदयेन अस्मिन् पॅनले विश्वस्य विभिन्नक्षेत्रेभ्यः ४० विशेषज्ञानां सम्मिलनाय अनुशंसा कृता अस्ति।

विकासशीलदेशेषु क्षमता-निर्माणस्य (Capacity Building) कार्यार्थं अन्ताराष्ट्रिय-सहयोगस्य आवश्यकतायाः उपरि सः बलं दास्यति।